संस्कृतवार्ता:

06.07.2024

सायम् - 06:20

**मुख्यवार्ता:**

- राष्ट्रपतिः द्रौपदी मुर्मू अद्य आरभ्य ओडिशा-राज्यस्य चतुर्दिवसीययात्रां करिष्यति।
- संसद: वित्तसंकल्पनासत्रस्य आरम्भः अस्य मासस्य द्वाविंशति दिनाङ्कात् भविष्यति।
- सर्वकारः अग्रिमेषु पञ्चवर्षेषु प्रायः द्विलक्षं यावत् ग्राम पञ्चायतेषु बहुद्देश्यीय-प्राथमिक - कृषि-ऋण-समिति-पैक्स इत्यस्य स्थापनां करिष्यति।
- ईरानस्य परिष्कारवादी-प्रत्याशिना मसूद पेज़ेशकियानेन राष्ट्रपति-निर्वाचनम् विजितम्।
- भारतीय बैडमिंटन क्रीडकः प्रियान्शु राजावत: एण्डर्स् एण्टोन्सेन् इत्येतं कनाडा ओपन बैडमिंटन प्रतिस्पर्धायाः प्रागुपान्त्यचक्रीय क्रीडायां पराजित्य उपान्त्यचक्रीय द्वन्द्वे प्रविष्टवान् ।

**प्रिज-ओडिशा::**

राष्ट्रपतिः द्रौपदी मुर्मू अद्य आरभ्य ओडिशा-राज्यस्य चतुर्दिवसीययात्रायां भविष्यति। राष्ट्रपतिः अद्य सायं भुवनेश्वरे उत्कलमणिपण्डितगोपबन्धुदासस्य षण्णवति तमे पुण्यतिथिसमारोहे आयोजिते कार्यक्रमे भागं गृह्णीयात्। श्वः राष्ट्रपति मुर्मू भगवान् जगन्नाथ, बलभद्र, देवी सुभद्रा, भगवतः सुदर्शनस्य च विश्वप्रसिद्धा रथयात्रायाः साक्षि भविष्यति यत् श्वः पवित्रतटीय-पुरीनगरे भविष्यति। स्वीय यात्रावधौ राष्ट्रपतिः सोमवासरे भुवनेश्वरस्थस्य उदयगिरी-खण्डगिरी-गुहयोः यात्रां करिष्यति, बिभूति-कानुनगो-कला-शिल्प-महाविद्यालयस्य, उत्कल-संस्कृति-विश्वविद्यालयस्य च छात्रैः सह संवादं करिष्यति। भुवनेश्वरसमीपे हरिदमदाग्रामे ब्रह्मकुमार्याः दिव्यनिवृत्तिकेन्द्रस्य उद्घाटनं तस्मिन् एव दिने ' स्थिरतायै जीवनशैली' इति अभियानस्य आरम्भं करिष्यति। राष्ट्रपतिः दिल्लीं प्रत्यागमनात् पूर्वं मंगलवासरे भुवनेश्वरनगरे राष्ट्रियविज्ञानशिक्षा-अनुसंधानसंस्थायाः (NISER) इत्यस्य त्रयोदशतमे स्नातकसमारोहे भागं भजिष्यति।

**संसद-बजटसत्रम् :**

संसद: वित्तसंकल्पनासत्रस्य आरम्भः अस्य मासस्य द्वाविंशति दिनाङ्कात् भविष्यति। संसदीयकार्याणां मन्त्री किरेन् रिजिजुः एकस्मिन् सामाजिकान्तर्जालीय सन्देश माध्यमेन सूचितवान् यत् सत्रं अगस्त मासस्य द्वादश दिनांकपर्यन्तं निरन्तरं भविष्यति। सः अवदत्, चतुर्विंशत्यधिक द्विसहस्र पञ्चविंशत्यधिक द्विसहस्र तम वर्षस्य केन्द्रीय वित्तसंकल्पनापत्रं जुलाई त्रयोविंशति दिनाङ्के लोकसभायां प्रस्तुतं भविष्यति। श्रीरिजिजुः अवदत् यत्, राष्ट्रपतिः द्रौपदी मुर्मू भारतसर्वकारस्य अनुशंसया वित्तसंकल्पनासत्राय संसदः द्वयोः सदनयोः आह्वानस्य प्रस्तावस्य अनुमोदनं कृतवति।

## अमितशाहः

गृहमन्त्रिणा अमितशाहेनोक्तं यत् सर्वकारः अग्रिमेषु पञ्चवर्षेषु प्रायः द्विलक्षं यावत् ग्राम पञ्चायतेषु बहुद्देश्यीय-प्राथमिक - कृषि-ऋण-समिति-पैक्स इत्यस्य स्थापनां करिष्यति। पैक्स इत्येषां स्थापना तेषु ग्राम-पंचायतेषु भविष्यति ये अधुना यावत् सहकारिता क्षेत्रात् बहिः सन्ति। श्रीशाहेन द्वयाधिकैकशततमे अन्ताराष्ट्रिय सहकारिता दिवसावसरे गांधीनगरस्य महात्मा मन्दिरे आयोजिते "सहकारेण समृद्धिः" इति कार्यक्रमावधौ घोषणैषा कृता। सहकारी क्षेत्रस्य सशक्तिकरणाय केन्द्र सर्वकारस्य विभिन्नानां योजनानां विषये प्रवदता श्रीशाहेन समितीनां व्यावहारिकी करणाय सहकारी-संजालस्य विस्तारे बलं प्रदत्तम। अस्मिन् अवसरे गृहमन्त्री अमितशाहः नैनो-यूरिया-इत्युर्वरकस्य क्रयणे कृषकाणां कृते गुजरात सर्वकारस्य विशिष्ट साहाय्योजनायाः शुभारम्भं कृतवान्। श्रीशाहेन दिल्ल्यां अमूलेत्यस्य प्रथमं जैविक भण्डारस्य आभासीय माध्यमेन उद्घाटनं विहितम्। कार्यक्रमावधौ राष्ट्रिय-सहकारी-जैविक-समित्याः भारत जैविक-गोधूम चूर्णस्याऽपि शुभारम्भो अभवत् ।

## ईरान-राष्ट्रपति-निर्वाचनम्

ईरानस्य परिष्कारवादी-प्रत्याशिना मसूद पेज़ेशकियानेन राष्ट्रपति-निर्वाचनम् विजितम्। तेन अतिरुढिवादी सईद जलीली इत्येषः पराजितः। पेज़ेशकियान इत्येषः हृदयशल्यचिकित्सकः अपि वर्तते। ईरानदेशे जूनमासस्य अष्टाविंशे दिनांके निर्वाचनम् अभवत् यत्र पेज़ेशकियान इत्यमुना द्विचत्त्वारिंत् दशमलव षड्प्रतिशतं मतदानानि संप्राप्तानि अपरत्र जलीली इत्यमुना अष्टत्रिंशत् दशमवल अष्टप्रतिशतं मतदानानि संप्राप्तानि।

## तमिलनाडु – के. आर्मस्ट्रांग ह्ननम्

तमिलाडु राज्यस्य मुख्यमन्त्रिणा एम. के. स्टालिनेन बहुजन समाजवादी पार्टीति दलस्य राज्य प्रमुखस्य के. आर्मस्ट्रांग इत्यस्य  हननप्रकरणे दोषिणांम् अन्वेषणार्थं आरक्षकाधिकरिणः आदिष्टाः। श्रीस्टालिनेन शोकसंतप्त-परिवाराय दलकार्यकर्तृभ्यश्च स्वीयसंवेदना प्रकटीकुर्वता कथितं यत् ह्यः कासुचिदेव होरासु आरक्षकदलेन अस्मिन् प्रकरणे अष्टौ जनाः निगडिताः। ह्यः सायं के. आर्मस्ट्रांग इत्यस्य हत्या चेन्नईनगरस्य पेरम्बूरस्थाने अभवत्। चेन्नई-चिकित्सालये शवपरीक्षणानन्तरं अद्य पार्थिवदेहः तस्य परिजनेभ्यः प्रदास्यते। अत्रान्तरे बसपा दलस्य कार्यकर्तृणः सीबीआई-अन्वेषण-याचनाम् अधिकृत्य चिकित्सालयात् बहिः एकत्रिताः समभवन्। बसपादलस्य प्रमुखा मायावती श्वः चेन्नई नगरे तमिलनाडु- बसपा प्रमुखस्य पार्थिवदेहाय श्रद्धांञ्जलिं समर्पयिष्यति। सुश्रीमायावती सामाजिकान्तर्जालिक- सन्देशे प्रोक्तती यत् हननमिदं अतीव-निन्दनीयं वर्तते सहैव सा दोषिभ्यः दण्डस्यापि याचनां विहितवती।

## असम-जलाप्लावः

असमराज्ये जलाप्लावेन सामान्यजनजीवनं अस्त-व्यस्तः समजायत । त्रिंशज्जन-पदेषु चतुर्विंशतिलक्षाधिकाः जनाः जलाप्लावेन संत्रस्ताः सन्ति। यद्यपि विगतासु चतुर्विंशति-होरासु कस्यचिदपि मुत्युसूचना नैवोपलब्धा। अनवरततया वृष्टि-कारणात् गुवाहाटी नगरे केषुचित् जलावरोधः संजातः अस्मात् कारणात् वाहनानां गमनागमनमपि प्रभावितमस्ति। भारतीय-ऋतु-विज्ञान- विभागेन असमस्य प्रोन्नतस्थानेषु अतिवृष्टेः भविष्यवाणी विहिता। अस्माकं संवाददात्रा विज्ञापितं यत् काजीरंगा - राष्ट्रीयोद्यान - प्राधिकरणेन एतावता शतं वन्यप्राणिनः संरक्षिताः, जलाप्लावेन नवतिः जन्तवः मृतास्सन्ति।

**विदेशमन्त्रालय-प्रधानमन्त्रीयात्रा**

प्रधानमन्त्री नरेन्द्र मोदी सोमवासरे रूसदेशस्य आधिकारिक यात्रां करिष्यति । स्वीय- यात्रावधौ श्री मोदी-रूसदेशस्य प्रधानमन्त्रिणा व्लादिमीर- पुतिन इत्यमुना सह द्वाविंशतितमे भारत-रूस-वार्षिक - शिखर सम्मेलने भागं भजिष्यति । विदेश सचिवेन विनय-मोहन क्वात्रा इत्यमुना ह्यः नवदिल्ल्यां वार्ताहरैः सह संवादे कथितं यत् अस्मिन् शिखर सम्मेलने रक्षा - व्यापार - निवेश - उर्जा - शिक्षा – विज्ञान- प्रौद्योगिकीं समेत्य विभिन्न-विषयाण्यधिकृत्य चर्चा भविष्यति । रूसदेशानन्तरं प्रधानमन्त्री नरेन्द्र मोदी मंगलवासरे बुधवासरे च ऑस्ट्रेलियादेशे भविष्यति। एकचत्त्वारिंशत् वर्षेषु कस्यचित् भारतीय-प्रधानमन्त्रिणः इयं प्रथमा ऑस्ट्रेलिया-यात्रा भविष्यति।

**प्रियान्शु-कनाडा ओपन:**

भारतीय बैडमिंटन क्रीडकः प्रियान्शु राजावत: एण्डर्स् एण्टोन्सेन् इत्येतं कनाडा ओपन बैडमिंटन प्रतिस्पर्धायाः प्रागुपान्त्यचक्रीय क्रीडायां पराजित्य उपान्त्यचक्रीय द्वन्द्वे प्रविष्टवान् । गतरात्रौ ऊनविंशति निमेषाधिक एकहोरात्मके प्रागुपान्त्यचक्रीय द्वन्द्वे राजावतः एण्टोन्सेन्-इत्यमुं एकविंशति-एकादश, सप्तदश-एकविंशतिः, एकविंशतिः-ऊनविंशतिः इति अङ्कान्तरालेन पराजितवान्।

॥ इति वार्ता: ॥